वणिजो नावि भिन्नायां यथागाधेऽप्लवेऽर्णवे ।
अपारे पारमिच्छन्तो हते शूरे महात्मनि ॥ २
मद्रराजे महाराज वित्रस्ताः शरविक्षताः ।
अनाथा नाथमिच्छन्तो मृगाः सिंहार्दिता इव ॥ ३
वृषा यथा भग्नशृङ्गाः शीर्णदन्ता गजा इव ।
मध्याह्ने प्रत्यपायाम निर्जिता धर्मसूनुना ॥ ४
न संधातुमनीकानि न च राजन्पराक्रमे ।
आसीद्बुद्धिर्हते शल्ये तव योधस्य कस्यचित् ॥ ५
भीष्मे द्रोणे च निहते सूतपुत्रे च भारत ।
यद्दुःखं तव योधानां भयं चासीद्विशां पते ।
तद्भयं स च नः शोको भूय एवाभ्यवर्तत ॥ ६
निराशाश्च जये तस्मिन्हते शल्ये महारथे ।
हतप्रवीरा विध्वस्ता विकृत्ताश्च शितैः शरैः ।
मद्रराजे हते राजन्योधास्ते प्राद्रवन्भयात् ॥ ७
अश्वानन्ये गजानन्ये रथानन्ये महारथाः ।

18

1 M_4 om. the ref —^{a}) K_4 B_2 $D_{3\,4\,9}$ T_2 M_{2-4} पतिते D_{n1} n_2 दुर्मर्षे, D_8 दुर्धर्षं (for °र्षे) —^{c}) D_n D_6 तत्र (for तव) —^{d}) $Ś_1$ K_1 ययु, D_1 स्थिता (for [अ]भवन्) M_1 प्रायस्ते विमुखा रणात्

2 D_1 om 2^a–3^b —^{b}) K_4 D_3 corrupt K_2 S महार्णवे, B (except B_2) D_n $D_{2\,5-9\,11}$ [ऽ]र्णवेऽप्लवे (by transp), D_4 [ऽ]र्णवे प्लवात् —^{c}) D_2 (marg as in text) अगाधे, T_4 अपार (for अपारे) — D_n $D_{6\,7}$ om (hapl) 2^d–3^c, $K_{4\,5}$ read it after 4^c —^{d}) D_2 (marg, orig as in text) हतनेत्रा (for हते शूरे) $K_{4\,5}$ B $D_{2\,5\,8-11}$ $T_{1\,2}$ M_1 महात्मना

3 For the sequence in $K_{4\,5}$, cf. v 1 2 D_n $D_{6,7}$ om 3^{abc}, D_1 om 3^{ab} (for both, cf. v 1 2) —^{a}) $K_{4\,5}$ महाराजे, M_{2-4} हते राजन् (for महाराज) —^{b}) $T_{1\,2}$ विप्रेसु (for वित्रस्ता) D_3 $T_{2\,3}$ शरवि क्षिता —^{d}) $D_{5\,7}$ यथा (for इव) T_3 मृगा सिंहैरि-वार्दिता

4 For the sequence in $K_{4\,5}$, cf v 1 2 $D_{1\,4}$ om (hapl) 4^{ab} —^{a}) $D_{5\,7}$ यथा वृषा (by transp), M_1 वृक्षा यथा G_3 भिन्नशृगा, M_4 भग्नदता (for °शृङ्गा) —^{b}) K_1 चीर्णे, T_2 जीर्णे (for शीर्णे) $D_{3\,10\,11}$ $M_{3\,4}$ यथा गजा (for गजा इव) —^{c}) D_n $D_{1\,4-7}$ प्रत्युपायाते (D_4 °ति), $T_{1\,3}$ प्रत्यपायाता, T_4 °पायातं (for °पायाम) —^{d}) D_{n1} M_3 निर्जितो; D_{n2} n_3 °ते; G_3 °सं (for °ता). $K_{4,5}$ B D_n D_{2-11} [अ]जात शत्रुणा, D_1 पाण्डुपुत्रकैः (for धर्मसूनुना)

5 D_1 om 5 —^{a}) D_4 T_4 G न संस्थातुम्, M_3 नासंधातुम् (for न सं°) G_2 अनीकेषु, G_3 °काना (for °कानि) —^{b}) D_3 तत्र (for न च) D_4 G_1 पराक्रमं (for क्रमे) —^{c}) $D_{5\,6}$ युधि (for बुद्धिर्). $Ś_1$ K_1 सैन्ये (for शल्ये) —^{d}) K_2 $D_{10\,11}$ भूयो, D_4 न च; D_3 ततो (for तव) G_2 M_3 यौधस्य

6 ^{a}) $D_{3\,6}$ भीष्मद्रोणे —^{b}) $T_{3\,4}$ $G_{2\,3}$ पातिते (for भारत) —^{c}) D_2 तद् (for यद्) K_3 तत्तु, D_1 भय (for तव) M यौधाना —^{e}) $G_{1\,3}$ तच् (for स) G_2 चै (for न) D_1 तद्भयं स शोक स्याद् (sub metric), T_2 तद्भयं च न शोकोपि —^{f}) K_3 [अ]भिवर्तत, K_4 B_5 D_8 [अ]भ्यवर्तते, M_{2-4} °वर्धत (for °वर्तत)

7 ^{a}) B D_n D_{5-9} तु (for च). B_1 $D_{4\,9}$ T_3 G M राजन् (for तस्मिन्) —^{b}) D_4 T_3 M महारथा — For 7^{ab}, T_4 subst

102* निराशाश्च हते शल्ये राजा राजन्महायशा ।

— D_1 om 7^{cd} —^{d}) $D_{2\,5\,7}$ निकृंताश् (for निकृत्ताश्) D_5 च सितै, S निशितै (for च शितै) $K_{4\,5}$ निकृत्ता(K_4 °ता)श्च सहस्रश, D_4 विनिकृत्ता शितै शरै —^{e}) D_{n3} n_3 $D_{5\,7}$ तस्मिन् (for राजन्) M_1 ये शिष्टा मद्रराजस्य —^{f}) M_{2-4} यौधास्

8 $Ś_1$ $K_{1\,2}$ D_{n1} n_2 D_6 M_3 om (hapl) 8, D_{n3} reads it on marg —^{ab}) D_{n3} transp गजानन्ये and रथानन्ये —^{c}) D_1 जवनानन्ये; $T_{1\,4}$ °संपन्नान्, G_2

आरुह्य जवसंपन्नाः पादाताः प्राद्रवन्भयात् ॥ ८
द्विसाहस्राश्च मातङ्गा गिरिरूपाः प्रहारिणः ।
संप्राद्रवन्हते शल्ये अङ्कुशाङ्गुष्ठचोदिताः ॥ ९
ते रणाद्भरतश्रेष्ठ तावकाः प्राद्रवन्दिशः ।
धावन्तश्चाप्यदृश्यन्त श्वसमानाः शरातुराः ॥ १०
तान्प्रभग्नान्द्रुतान्दृष्ट्वा हतोत्साहान्पराजितान् ।
अभ्यद्रवन्त पाञ्चालाः पाण्डवाश्च जयैषिणः ॥ ११
बाणशब्दरवश्चापि सिंहनादश्च पुष्कलः ।
शङ्खशब्दश्च शूराणां दारुणः समपद्यत ॥ १२
दृष्ट्वा तु कौरवं सैन्यं भयत्रस्तं प्रविद्रुतम् ।
अन्योन्यं समभाषन्त पाञ्चालाः पाण्डवैः सह ॥ १३
अथ राजा सत्यधृतिर्जितामित्रो युधिष्ठिरः ।
अद्य दुर्योधनो हीनो दीप्तया नृपतिश्रिया ॥ १४
अद्य श्रुत्वा हतं पुत्रं धृतराष्ट्रो जनेश्वरः ।
निःसंज्ञः पतितो भूमौ किल्बिषं प्रतिपद्यताम् ॥ १५
अद्य जानातु कौन्तेयं समर्थं सर्वधन्विनाम् । C 9 1012 B 9 19 16 K 9 19 17

वाजिसपन्ना , M2 4 जय (for जव°) D4 विमुखास्त्यज्य संग्राम —d) K4 Dn3 D2 4 5 7–9 G3 M1 पदाता , D3 प्रधाना , T4 प्रद्रुता (for पादाता) K3 5 D3 4 10 11 तथा, K4 तदा, D1 दिश (for भयात)

9 a) D3 4 10 11 द्विसहस्राश्, T3 4 G द्विसहस्रं —b) D1 गिरिराजसमा युधि —T4 om. (hapl) 9c–11d —d) Ś1 K1 2 D4 अंकुशाकुश-, K4 5 अकुशाग्रष्ट-, M1 साकुशागुष्ठ Dn D2 5 7 10 11 -नोदिता D1 अकुशेन प्रणोदिता

10 T4 om 10 (cf. v l. 9) D1 om 10–12 —a) Dn D2 5–7 T3 G2 रणे (for रणाद्) K1 5 D9 भरतश्रेष्ठस् —b) B1 D4 9 भयात्, D3 दिशं (for दिश) —c) D3 10 11 G3 M3 धावतश्, D4 वेपतश्, G2 जीवतश् (for धावन्तश्) Dn2 [s]श्चान्, D6 [s]प्यथ (for चापि) Dn* D10 11 G2 [अ]पश्याम, D3 6 पश्याम, D4 दृश्यत (for [अ]दृश्यन्त) K2 T2 धा(T2 या)वतश्च प्रदृश्यत, D7 धावस्तथाप्यदृश्यंत —d) Dn D6 corrupt D3 10 11 श्व(D3 श्वा)समानाम्, M1 श्वसंतश्च (for श्वसमाना) K1 यथोरगा , B D1. 5 7–9 शराहता , D2 शरार्दिता D3 महारयान्, D10 शरातुरान्, D11 श्रमातुरान्, Bom ed शराहतान् (for °तुरा)

11 T4 om 11 (cf v l 9) D1 om 11 (cf. v l 10) —a) K4 5 B1 D6 9 T3 G1 2 M1. 3 4 हतान्, D4 ह्रतान्, D7 क्षतान, G3 हते, M2 गतान् (for द्रुतान्) —The portion of the text from 11c up to 35b is lost in B3 on missing folio —c) Ś1 K1. 3 D10 11 T3 अभ्यवर्तंत D2 7 पाचाळा , D3 पांचालान्, Bom ed पचाला

12 B2 missing (cf. v l. 11) D1 om. 12 (cf v l 10). —a) K2 T4 -शंख- (for शब्द). K3 5 B4 5 D2. 5 8. 9 T3 M1 -रवाश्, K4 Dn D3. 4 6 7 10 रवाश् (for रवश्) B1 3 D4 9 [ए]व (for [अ]पि) —b) K2 4 5 B3–5 D5 M1 सिंहनादाश्च पुष्कला (K2 °रा), Dn D2–4 6 7 10 °नादाश्च पुष्कलान् —c) B (B2 missing) D8 9 नादश्, D4 M1 -शब्दाश् (for शब्दश्) —d) D4 दारुणास्तत्र जज्ञिरे, M1 समपद्यत दारुण

13 B2 missing (cf v l. 11) —a) T3 G1 त दृष्ट्वा, T4 G2 3 तद्दृष्ट्वा (for दृष्ट्वा तु) S तावक (for कौरव) D1 दृष्ट्वा तु कौरवानीकं —b) T3 4 भयाद्, G* जय (for भय-) D4 -प्रस्तं (for -त्रस्त) B1 परिद्रुत, D3 विप्र°, D10 प्रद्रु° (for प्रवि°) —c) T1 समभाषते, G2 °धावत (for °भाषन्त) —d) D2 7 पांचाळा , Bom ed पचाला

14 B2 missing (cf v l 11) —a) D3 7 अथ (for अद्य) D1 हतामित्र (for सत्यधृतिर्) —b) D1 सत्यवादी, D3 4. 10 11 T3 G M हतामित्रो (for जिता°) —c) K3 Dn D2 7 (orig) दीनो, D1 7 (marg sec m) राजा, D6 om. (hapl) (for हीनो) —d) G2 दीप्तोय (for दीप्तया) K2 3 दीप्तया राज्यसंपदा, B (B2 missing) D5 9 दी(D8 द)प्तया नृपतिश्रिय , Dn त्यज्यता नृपतिश्रिय (Dn2 य), D1. 7 (marg sec m) भाग्यहीनो ह्यवस्थित , D2 5 (before corr) 7 (orig) दी-(D7 ही)यता नृपति श्रियं, D4 श्रिया च दीप्तया नृप —After 14, D4 ins

103* अद्य दिष्ट्या क्षमाशयनं निरतामामुचक्षुप (sic) ।
द्रौपद्या यश्च सकल्प ससिद्ध इति घुष्यताम् ।

15 B2 missing (cf v l 11) —a) D6 स ह (for अद्य) K5 [आ]श्रुत्य (for श्रुत्वा) G2 शल्य (for पुत्र) —b) D1 नरेश्वर , G3 जनेश्वर D4 धृतराष्ट्रे जनाधिपे —c) K4 5 B (B2 missing) Dn D1–3 5–7 9–11 विह्वल (D2. 7 °ह्र), D8 विहस्तु. (sic) (for नि.संज्ञ.). —D6 reads 15d–16d twice. —d) T1. 2 कश्मलं;

C 9 1012
B 9 19 17
K 9 18 17

अद्यात्मानं च दुर्मेधा गर्हयिष्यति पापकृत् ।
अद्य क्षत्तुर्वचः सत्यं स्मरतां ब्रुवतो हितम् ॥ १६
अद्यप्रभृति पार्थांश्च प्रेष्यभूत उपाचरन् ।
विजानातु नृपो दुःखं यत्प्राप्तं पाण्डुनन्दनैः ॥ १७
अद्य कृष्णस्य माहात्म्यं जानातु स महीपतिः ।
अद्यार्जुनधनुर्घोषं घोरं जानातु संयुगे ॥ १८
अस्त्राणां च बलं सर्वं बाह्वोश्च बलमाहवे ।
अद्य ज्ञास्यति भीमस्य बलं घोरं महात्मनः ॥ १९
हते दुर्योधने युद्धे शक्रेणेवासुरे मये ।
यत्कृतं भीमसेनेन दुःशासनवधे तदा ।
नान्यः कर्तास्ति लोके तदृते भीमं महाबलम् ॥ २०
जानीतामद्य ज्येष्ठस्य पाण्डवस्य पराक्रमम् ।
मद्रराजं हतं श्रुत्वा देवैरपि सुदुःसहम् ॥ २१
अद्य ज्ञास्यति संग्रामे माद्रीपुत्रौ महाबलौ ।

G1 8 निमेज्ञ (for किल्बिषं) Ś1 K1-3 समपद्यता (K2 °त); D1 प्रतिपश्यति, D5 7 प्रत्यपद्यता, D10 11 T1 3 4 G2 3 M4 प्रतिपद्यते, T2 G1 °परस्यते, M3 °पद्यत (for °पद्यताम्)

16 For the repetition in D6, cf v l 15 B2 missing (cf v l 11) — a) D1 जानतु, T2 जानाति T3 4 G M अद्य जानाति बीभत्सु — b) D6 (both times) समर्थ; G2 प्रवरं, G3 समक्षं (for समर्थं) — D1 om (hapl) 16^{cd} — c) T4 [आ]त्मनस् (for [आ]त्मानं) Ś1 K1 3 सु, K2 स्व, B (B2 missing) Dn D5 6 (both times) 7-9 तु (for च) — f) D4 सर्वेषां, T4 स्मरतो (for °तां) K4 प्रवृतो, T3 नृपको (for ब्रुवतो)

17 B2 missing (cf v l 11) D1 om (hapl) 17 — a) K3 4 B1 D3 4 8 पार्थाश्च, B5 शाल्वाश्च; D10 11 T4 पार्थं च, T1 2 पार्थस्य (for पार्थांश्च) — b) D3 G3 प्रेष्यभूता, M1 °वत्तान् (for °भूत) D10 11 ह्युपाचरन्, T1 2 G3 ह्युपा°, T3 [ऽ]भ्युपाचरेत्, G1 M3 [ऽ]प्युपाचरन्, G2 M2 4 [ऽ]भ्युपा° (for उपा°) — For 17^{ab}, Dn D2 5-7 subst

104* अद्यैव च हि पार्थाना यत्कृतं पूर्वकर्मभि ।
[Dn हि च (by transp), D6 हि तु]

— c) D2 M1 विजानाति D9 न यो (for नृपो)

18 B2 missing (cf v l 11) — a) K2 Dn2 n3 D3 4 महात्म्यं, D5 माहात्म — b) D4 महात्मन (for महीपति) B5 जानातु महतीपति, D1 3 10 11 विजानातु महीपति — D1 om 18^{c}–22^{d} — c) Dn D4 घोरं (for -घोषं), D8 अद्यार्जुन चमूघोर, D7 °नस्य च धनुर् — d) D8 T1 2 G1 जानाति D3 स विजानातु संगरे — T3 4 G ins after 18 T1 2 after 19^{b}

105* पुत्राणां च वधं घोरं भीमेन श्रोष्यते नृप ।
[T3 भीम च; T4 भीमाच्च (for भीमेन) T1 2 G1 नृप (for नृप°)]

19 B2 missing (cf v l 11) D1 om 19 (cf v l 18) T3 4 G om (? hapl) 19^{ab} — a) D4 शस्त्राणां (for अस्त्राणां) D9 तु (for च) D2 7 बळ — b) B1 राज्ञश् (for बाह्वोश्) D2 7 बळम् — After 19^{b}, T1 2 ins 105* K3 om (hapl) 19^{c}–21^{d} — c) D4 ज्ञास्यंति, D9 ज्ञास्यसि (for °ति) — d) D2 7 बळ

20 B2 missing (cf v l 11) D1 om 20 (cf v l 18) K3 om 20 (cf v l 19) — a) D4 क्रुद्धे, D9 घोरे (for युद्धे) — b) K4 D4 9 [ण]व (for [ए]व) K2 महे, K6 नते, D3 10 बले (for मये) D7 शक्रेणेवासुरोपमे, S °णेव तु शंबरे — c) K4 भीमसेनस्य (for °नेन) — d) D2 7 T3 G2 तथा — e) S कोन्य (for नान्य) Dn त्रि, M1 3 [अ]स्मि (for [अ]स्ति) K4 B1 4 5 D9 लोके तु (K4 स, B1 5 च), K5 Dn D3 5-8 10 11 T4 G1 लोकेस्मिन्; T1-3 G2 3 M तल्लोके (by transp) D2 नान्योस्मिंल्लोके कर्तास्ति, D4 कोन्यस्कर्ता त्रिलोकेषु — f) D9 ज्ञानभीम (sic) (for ऋते भीम) K2 महाबले (for °बलम्) Ś1 K1 D3 4 10 11 ऋते भीमान्महाबलात्

21 B2 missing (cf v l 11) D1 om 21 (cf v l 18) K3 om 21 (cf v l 19) — a) D4 corrupt K4 5 जानीयाद् (for °नीताम्) D5 अय (for अद्य) B4 5 श्रेष्ठस्य (for ज्येष्ठस्य) D3 10 S (except T1 2) अद्य ज्येष्ठस्य जानीता (T3 G2 M °नातु), D6 जानंतु वा ज्येष्ठस्य (submetric) — c) Dn D2 5-7 दृष्ट्वा (for श्रुत्वा) D10 मद्रराजवधं श्रुत्वा — d) B (B2 missing) Dn D2 5-9 दुरासद (for सुदुःसहम्)

22 B2 missing (cf v l 11) D1 om 22 (cf v l 18) — a) D11 ज्ञास्यति — b) B (B2 missing) Dn D2 5-9 च पाण्डवौ; D3 10 11 दुरुत्सहौ (for महाबलौ) — D8 om (hapl) 22^{c}–24^{b} — c) D8 सुबले, D7 सौबळे (for सौबले) B1 3 D3 4 10 11 T G1 3 वीरे, Dn राजन् (for शूरे), — d) K2 गंधा**,

निहते सौबले शूरे गान्धारेषु च सर्वशः ॥ २२
कथं तेषां जयो न स्याद्येषां योद्धा धनंजयः ।
सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ॥ २३
द्रौपद्यास्तनयाः पञ्च माद्रीपुत्रौ च पाण्डवौ ।
शिखण्डी च महेष्वासो राजा चैव युधिष्ठिरः ॥ २४
येषां च जगतां नाथो नाथः कृष्णो जनार्दनः ।
कथं तेषां जयो न स्याद्येषां धर्मो व्यपाश्रयः ॥ २५
भीष्मं द्रोणं च कर्णं च मद्रराजानमेव च ।
तथान्यान्नृपतीन्वीराञ्शतशोऽथ सहस्रशः ॥ २६
कोऽन्यः शक्तो रणे जेतुमृते पार्थं युधिष्ठिरम् ।
यस्य नाथो हृषीकेशः सदा धर्मयशोनिधिः ॥ २७
इत्येवं वदमानास्ते हर्षेण महता युताः ।
प्रभग्नांस्तावकान्राजन्सृञ्जयाः पृष्ठतोऽन्वयुः ॥ २८
धनंजयो रथानीकमभ्यवर्तत वीर्यवान् ।
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महारथः ॥ २९
तान्प्रेक्ष्य द्रवतः सर्वान्भीमसेनभयार्दितान् ।
दुर्योधनस्तदा सूतमब्रवीदुत्स्मयन्निव ॥ ३०
न मातिक्रमते पार्थो धनुष्पाणिमवस्थितम् । C 9 1028 B 9 19 32 K 9 18 24

D11 प्रवीरेषु (for गान्धारेषु)

23 B2 *missing* (cf. v l. 11) D8 om 23 (cf v l 22) — ^{a}) K2 Dn1 D4 10 11 transp तेषां and जयो न — ^{b}) D4 9 योधा — ^{c}) Dn1 n2 D4 9 सात्यकी D1 भीमसेनाद्या (for °नश्च) — ^{d}) D1 द्रौपदेयाश्च, D4 दृष्टद्युम्नश्च

24 B2 missing (cf v l 11) D8 om 24^{ab} (cf v l 22) D1 om 24^{ab} — ^{a}) B (B2 missing) Dn D2 5–7 9 द्रौपदी (*for* द्रौपद्यास्) — ^{c}) K5 D3 शिपडी — ^{d}) D1 यत्र राजा, D4 राजा चापि (for राजा चैव)

25 B2 missing (cf v l 11) — ^{a}) T2 3 एषां च, T4 एतेषां (for येषां च) K3–5 D1 3 5 7 8 10 11 T1 G3 M1 जगतो (for °तां) Dn D4 6 येषां चैव जगन्नाथो — ^{b}) K4 5 कृष्णश्चैव (for नाथ कृष्णो) — ^{d}) M1 येषु (for येषां) K4 कृत्स्न-, K5 कृष्णो (for धर्मो) D1 हि रक्षक, M1 व्यपाश्रित (for °श्रय) — After 25, T G ins

106* लाभस्तेषां जयस्तेषां कुतस्तेषां पराभव ।
येषां नाथो हृषीकेश सर्वलोकविभुर्हरि ।

[(L 2) T3 एषां (for येषां) T4 -गुरुर् (for विभुर्) T3 पर (for हरि)]

26 B2 missing (cf. v l. 11) D1 om 26–27 — ^{a}) K2 कोन्यो द्रोण, D3 T1 3 4 G2 M2 4 भीष्मद्रोणौ (D3 T1 °णं) (for भीष्म द्रोण) — ^{b}) Ś1 K1 2 मद्रराजं तथैव च — ^{c}) D3 4 नृपतिं (for °तीन्) B (B2 missing) Dn D2 6–9 अ(Dn2 त)थान्यान्नृ(Dn D2 6–7 °न्भू)पतीन्सर्वा(Dn1. n2 °न्वीरा)न्

27 B2 missing (cf v l 11) D1 om 27 (cf v l. 26) — ^{b}) B (B2 missing) Dn D2 4–7 9–11 M1 ऋते पार्थाद्युधिष्ठिरात्, D8 °र्थो युधिष्ठिर — ^{c}) D2 तस्य, D4 येषां (for यस्य) — ^{d}) Ś1 K D3 6 10 11 T1. 2 सदा सत्य Dn सप्रसन्नो, D4 शमधर्म, D8 सदा धर्मो (for सदा धर्म) D2 6 7 मयो (for यशो-)

28 B2 *missing* (cf v l 11) — ^{a}) Ś1 K1 2 वदमानास्तु, D9 °मानस्ते, M °मानैस्तैर् — ^{b}) B (B2 missing) Dn D2 5–9 T3 वृता (D9 °त), D1 श्रुता, M युतै (for युता) — ^{c}) B (B2 missing) D2 3 5 7 प्रणुन्नास्, Dn प्रद्रुतास्, T1–3 G1 3 M2–4 प्रभिन्नांस् (for प्रभग्नांस्) Ś1 K D3 सर्वतो (for तावकान्) Ś1 K D1. 3 10 11 योधान्, B3–5 D2 4–9 युद्धे (for राजन्) — K5 reads 28^{d}–29^{b} on marg — ^{d}) Ś1 K D1 3 6 10 11 स(K4 5 प्र)हृष्टा, Dn1 n2 सजया, M1 पाञ्चाला (for सृञ्जया) Ś1 K1–3 सर्वतो (for पृष्ठतो) T4 ययु (for ऽन्वयु)

29 B2 missing (cf v l 11) K5 reads 29^{ab} on marg K3 om 29^{c}–30^{b} D1 om 29^{c}–36^{d} — ^{c}) B4 D4 M तु, D8 न, D10 om (for च) — ^{d}) D2 महारथा, D3 रथ

30 B2 missing (cf v l. 11) K3 om 30^{ab}, D1 om. 30 (for both, cf. v l. 29) — ^{a}) K5 corrupt. K2 तं (for तान्) D3 ते (submetric) (for प्रेक्ष्य) T2 द्रवतान्; T3 पुरत, G3 समर (sic) (for द्रवत) D2 5 7 शूरान्, T3 G1 संख्ये, T4 सघे, G2 3 M संखे (for सर्वान्) — ^{b}) K2 भीमसेने — ^{c}) D4 तथा (for सदा) — ^{d}) K3 त स्मयन्, B (B2 missing) D2 4–11 T G विस्म° (for उत्स्म) Dn अब्रवीद्विस्मयान्वित, Bom ed °द्विजयाय च

C. 9 1010
B 9 19 23
K 9 18 34

जघने सर्वसैन्यानां ममाश्वान्प्रतिपादय ॥ ३१
जघने युध्यमानं हि कौन्तेयो मां धनंजयः ।
नोत्सहेताभ्यतिक्रान्तुं वेलामिव महोदधिः ॥ ३२
पश्य सैन्यं महत्सूत पाण्डवैः समभिद्रुतम् ।
सैन्यरेणुं समुद्धूतं पश्यस्वैनं समन्ततः ॥ ३३
सिंहनादांश्च बहुशः शृणु घोरान्भयानकान् ।
तस्माद्याहि शनैः सूत जघनं परिपालय ॥ ३४
मयि स्थिते च समरे निरुद्धेषु च पाण्डुषु ।
पुनरावर्तते तूर्णं मामकं बलमोजसा ॥ ३५
तच्छ्रुत्वा तव पुत्रस्य शूराग्र्यसदृशं वचः ।
सारथिर्हेमसंछन्नाञ्शनैरश्वानचोदयत् ॥ ३६
गजाश्वरथिभिर्हीनास्त्यक्तात्मानः पदातयः ।
एकविंशतिसाहस्राः संयुगायावतस्थिरे ॥ ३७
नानादेशसमुद्भूता नानारञ्जितवाससः ।

---

31 B2 missing (cf v 1 11) D1 om 31 (cf v 1 29) — a) K3 B (B2 missing) D3 5 10 11 माम्, K4 5 न च (for न मा) Dn D2 4 6 7 न माम (D4 मा द्य)तिक्रमेत्पार्थो, D9 मा प्रति क्रमेत पार्थो, T3 G2 स मा न मन्यते पार्थो, T4 नामाति मन्यते पार्थान, G1 न मावमन्यते पार्थो, G3 नावमानम्य ते पार्थो, M समतिक्रम्य वै पार्थ — b) B (B2 missing) D2 4 8 9 धनुष्पाणिरवस्थित (D4 8 °त) — c) Ś1 K1-3 जघनं, Dn जघेन, D2 (orig) जघन्य, D2 (marg) जघान, C4 जघने (as in text) — d) D6 पालय (for -पादय) K4 5 अश्वानां प्रतिसक्षये, D1 T G शनैरश्वान्प्रचो(D4 °णो)दय (T3 °यन्), M चोदयाश्वाञ्शनैरिव

32 B2 missing (cf v 1 11) D1 om 32 (cf v 1 29) — a) D2 जघान, D3 तवमे, M4 जघनेद् (for जघने) B (B2 missing) D2 7-9 वर्तमान (for युध्य°) K4 5 युध्यमान हि सतत — b) Dn1 lacuna D3 corrupt D4 G1 3 M मा (for मा) D4 T3 G M न सशय, D10 11 समतत (for धनंजय) — c) K3 B1 3 4 D3 4 8-10 [उ]त्सहेद् (for °हेत) K4 5 B6 Dn D2 6-7 T G1 M2-4 त्य(D7 अ)तिक्रान्तु (K4 T2 3 °त), D4 [अ]त्यति° (for [अ]भ्यति°) G2 नोत्सहिष्यति विक्रान्तु — d) D2 T2 वेलाम् B4 6 Dn महोदधे, D4 °दये, D5 °निधि (for दधि)

33 B2 missing (cf v 1 11) D1 om 33 (cf v 1 29) — a) T3 जन्यन (sic), T4 धान्य (for सैन्यं) D3 सममाह (sic), D4 महत्सूत, D10 om, G2 महच्छूरै (sic) (for महत्सूत) K4 5 D6 7 पश्य सूत महत्सैन्यं — b) T3 4 G समभिद्रुत — c) B3 पश्य (for सैन्य-) K4 Dn1 D2-4 7 M1 रेणु (for रेणुं) K3-5 B1 4 6 Dn3 D2-11 T1-3 समुद्भूत, B3 महद्भूत (for समुद्धूत) — d) Ś1 K1 पश्य सर्वं, D3 8 M3 पश्य सैन्य; D4 T4 G पश्य चैत (for पश्यस्वैन)

34 B2 missing (cf v 1 11) D1 om 34 (cf v 1 29) — a) D1 बहुश सिंहनादान्स्तु — b) K1 2 महद्भयान, B (B2 missing) Dn D2 4-9 महाभयान, D2 10 11 भयावहान (for नकान्) — c) T3 4 G M1-4 यानं (for याहि) Dn D 2-8 शनै (for शनैं) — d) Dn यचन (for जघनं) K4 5 P (B2 missing) D4 8 M1 2 परिपालयन, D1 °पालय; D4 °पालनं (for °पालय)

35 B2 missing for 35ab (cf v 1 11) D1 om 35 (cf v 1 29) — b) D3 M3 निरुद्धेषु, D4 °रुद्धेषु (for °रुद्धेषु) B (B2 missing) Dn D4 6-9 युध्यमाने (D9 °न) च पाण्डवान (B [B2 missing] D5 9 °वे) — c) K4 5 आवर्तन्त्य(K °र्त्य)ते (for °र्तते) B Dn D4 9 -9 सूत (for तूर्णं) — d) D बलम् Dn D6 संजसा (for ओजसा) D4 मामक बलमतम

36 D1 om 36 (cf v 1 29) — a) D1 तच्छ्रुत्वं (for तच्छ्रुत्वा) — b) D 6 शूराग्र्य, D10 11 M1 Cap शूरार्य-, T3 4 G M2-4 शूरस्य, C4 (gloss धर्मस्य इति शेष) शूराय (for शूराग्र्य) Ś1 K D2 4 T1 2 भाषणो (K3-5 D3 4 °षित) मधुर वच — d) D5 6 शनैर् (for शनैर्) B1 D3 प्रचोदयत्; D 6-7 अनो° (for अचो°)

37 Before 37, D1 ins संजय उवाच — a) D2 हीन, D3 हीनास्, T3 भिगास्, G2 पार्थिवास् (for हीनास्) D1 अवशिष्टास्तदा योधास् — b) Ś1 K1 2 त्यक्त्वात्मान, D1 त्यक्त्वा प्राणान; D7 8 त्यक्त्वात्मान (for त्यक्ता°) — d) D3 वतस्थिरे (for [अ]व°) D1 3 संयुगे चावतस्थिरे

38 a) G3 -जात (for -देश) M3 4 समुद्भूता, M3 °स्पना (for °द्भूता) — b) K4 5 D10 रजत (for रञ्जित) T3 M3 वासन (for °स). B Dn D2 8 6-9 11 नानानगरवासिन; D1 °शास्त्रविशारदा — D1 om 38c-42d B1 reads 38c-39d on marg — c) B (except B2) D6 व्यवस्थितास् (for अव°) D4 T2 3 तथा (for तदा) M2-4 योधा

अवस्थितास्तदा योधाः प्रार्थयन्तो महद्यशः ॥ ३८
तेषामापततां तत्र संहृष्टानां परस्परम् ।
संमर्दः सुमहाञ्जज्ञे घोररूपो भयानकः ॥ ३९
भीमसेनं तदा राजन्धृष्टद्युम्नं च पार्षतम् ।
बलेन चतुरङ्गेण नानादेश्या न्यवारयन् ॥ ४०
भीममेवाभ्यवर्तन्त रणेऽन्ये तु पदातयः ।
प्रक्ष्वेड्यास्फोट्य सहृष्टा वीरलोकं यियासवः ॥ ४१
आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः ।
धार्तराष्ट्रा विनेदुर्हि नान्यां चाकथयन्कथाम् ।
परिवार्य रणे भीमं निजघ्नुस्ते समन्ततः ॥ ४२
स वध्यमानः समरे पदातिगणसंवृतः ।
न चचाल रथोपस्थे मैनाक इव पर्वतः ॥ ४३
ते तु क्रुद्धा महाराज पाण्डवस्य महारथम् ।
निग्रहीतुं प्रचक्रुर्हि योधांश्चान्यानवारयन् ॥ ४४
अक्रुध्यत रणे भीमस्तैस्तदा पर्यवस्थितैः ।
सोऽवतीर्य रथात्तूर्णं पदातिः समवस्थितः ॥ ४५ C. 9 1043 B 9 19 47 K 9 18 48

39 D1 om 39 (cf v 1 38) B1 reads 39 on marg — *a*) D1 घोर , S (except T1) येगात (for तत्र) — *b*) D3 स दृष्ट्वा न D1 T1 2 मगृष्टाना, D2 मदृ (for सहृ) D1 परं मह (for परस्परम्) — *c*) G3 संमर्ष (for संमर्द) D1 दार्ढ्यात्ममयनो जज्ञे — *d*) T3 भयस्र (for भयानक)

40 D1 om 40 (cf v 1 38) — *a*) S1 K (except K2) D 4 8 9 11 T3 M1 भीमसेनम् T3 8 तथा (for तदा) — *b*) S1 K D3 4 8 10 11 T3 M1 धृष्टद्युम्नश्च पार्षत — *c*) D 1 वलेन — *d*) Dn नाना देशा, D 1 G2 देशा Dn1 n2 D2-4 T2 G1 M न्य (D नि) वारयत S1 K D2 4 10 11 नानादेश्यान (K4 दयादि , D1 नान) वारयत (K1 °यन) — After 40, D1 reads 41[ab] for the first time, repeating it in its proper place

41 D1 om. 41 (cf v 1 38) T1 om. 41[ab] — *a*) K2 corrupt Dn D 2 भीमसेने (for मेव) D1 [अ]न्यधावत — *b*) Dn D 2-4 रणे, D1 अन्ये (for रणे) K1 अनु D2 [ऽ]न्ये च; D1 च तु (for ऽन्ये तु) — D3 om 41[c]-42[c] — *c*) K2 प्रक्ष्वेन्य (sic), D आस्फोट्य, T 2 M प्रक्ष्वे (T2 °से) ड्य, T1 प्रक्षेप्य (for प्रक्ष्वेड्य) K2 [आ]स्फोट्य (for °ट्य) S1 K1 - 4 संहृष्टा (for °हृष्टा) K5 B Dn D 1 2-6 G प्रहृष्टा (K3 B1 4 5 D1 °ष्ट, D2 ता, G1 °ष्ट, G 3 क्ष्या) स्फोटसंहृष्टा (K5 युद्धा) — *d*) D वीरा (for वीर) S1 K1 लोक, D लोक (for लोक) K3 नियासय , T 2 G1 3 इया (for यिया) K2 वीर स्वर्गिय यया

42 D1 om 42[ab c] (cf v 1 38) D2 om 42 (cf v 1 41) — *a*) Dn D1-3 न, T1 2 च (for तु) — *b*) T1 2 संक्रुद्धा (for संरब्धा) D 1 युध (for युद्ध) — *c*) S1 K1 निनेदुर् (for विने°) Dn ते (for हि) — *d*) S1 K1-3 नान्या, Dn [ऽ]न्योन्यं (for नान्या) Dn2 D2 5 चाकथयत्, D 6 M1-4 वाकथयन्, D10 11 T G अकथयन् (for चाक°) S1 K1 2 कथा M1 नानावाचान्यवादयन — After 42[d], M1 ins

107* निगृहीतु तदा क्रुद्धा समन्तात्पर्यवारयन् ।

— *f*) D3 संनिजघ्नु (for निजघ्नुस्ते) B1 5 परस्पर (for समन्तत)

43 *a*) G3 सं (for स) D1 कौंतेय (for समरे) — *b*) D3 पदाती, D1 पदातिर् (for पदाति) — *c*) B D2 5 7-11 M2 त (D 7 हृ) न स्थानात (for रथोपस्थे)

44 D1 om 44[a]-45[b] G1 3 om 44-45 D1 reads 44[ab] for the first time after 40 — *a*) B5 Dn D2 6 T2 4 G2 M1 3 4 तत (for ते तु) D3 T1 युद्धो (for क्रुद्धा) — *b*) B (except B2) D1 (first time) * पादवानां (for पाण्डवस्य) D3 4 (both times) महारथ, T M1 °रथा, M2 पदानुगा, M3 महारथ (for °रथम्) G2 पादवा सुमहारथा — *c*) K1 निगृह्य त; B2 Dn2 n3 D2-5 7 8 10 T2 3 M निगृ (D3 प्रगृ, M1 न गृ) हीतु (for निग्र°) K2 B Dn D3 5-7 10 11 G2 प्रवृत्ता, K1 प्रजह्रुर् (for प्रचक्रुर्) D1 मे (for हि) — *d*) D1 8 T2 3 योधाश्, M योधास् (for योधांश्) S1 K1 2 अन्यान्, D9 तान (submetric), T1-3 M1 चान्ये (for चान्यान) K2 3 B1 Dn3 D3 8-11 T1 G2 अवारयत, D2 6-7 T1-3 M1 न्यवारयन् (D2 5 यत्) (for अवा°) Dn1 n2 योधास्तानन्वधारयन्

45 D1 om 45[ab], G1 3 om 45 (for both, cf v 1 44) K1 repeats 45[ab] after 46[b] — *a*) M1 अयुध्यत (for अक्रु) Dn वीरम् (for भीमस्) — *b*) B Dn D2 6-9 रथैः, M2 तथा (for तदा) S1 **वस्थितै, K1-3 समव, B1-8 D8 9 T3 पर्युप°, B1 5

C 9 1043 / B 9 19 46 / K 9 18 49

जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम् ।
अवधीत्तावकान्योधान्दण्डपाणिरिवान्तकः ॥ ४६
रथाश्वद्विपहीनांस्तु तान्भीमो गदया बली ।
एकविंशतिसाहस्रान्पदातीनवपोथयत् ॥ ४७
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ।
धृष्टद्युम्नं पुरस्कृत्य नचिरात्प्रत्यदृश्यत ॥ ४८
पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः ।
संभग्ना इव वातेन कर्णिकाराः सुपुष्पिताः ॥ ४९
नानापुष्पस्रजोपेता नानाकुण्डलधारिणः ।
नानाजात्या हतास्तत्र नानादेशसमागताः ॥ ५०
पताकाध्वजसंछन्नं पदातीनां महद्बलम् ।
निकृत्तं विबभौ तत्र घोररूपं भयानकम् ॥ ५१
युधिष्ठिरपुरोगास्तु सर्वसैन्यमहारथाः ।
अभ्यधावन्महात्मानं पुत्रं दुर्योधनं तव ॥ ५२

प्रत्युप°, Dn1 पर्यवस्थित (for °स्थिते°) — ^{d}) Ś1 K1–4 D4 समतिष्ठत, K5 स*तिष्ठत, B1. 5 D8 9 T3 समुपस्थित (for समव°)

46 ^{a}) K3 B (except B5) D3 8–11 T G1 2 प्रति- (for परि) K2 4 D2 3 5 7 M4 च्छिन्नां (for -च्छन्ना) — After 46^{b}, K4 repeats 45^{ab} — ^{c}) K4 अब्रवीत् (for अवधीत्) D1 एको, M1 3 4 यौधान् (for योधान) — ^{d}) B1 3 D2 5 7–9 शूल(D2 °ळ)पाणिर् (D9 °णिम्), D4 दृढहस्तम् (for °पाणिर्)

47 D1 om 47^{ab} — ^{a}) T4 गजाश्व (for रथाश्व) T3 प्रवि, T4 रथ-, G विप्र- (for -द्विप-) B3 वीरास्तु, Dn D2 5–7 -वीराश्च, D9 -हीनाश्च, G1 -हीणास्तु, G3 -हीणास्तास् (for -हीनास्तु) — ^{b}) D9 स (for तान) T3 भूमौ (for भीमो) D2 छादयन् (for गदया) D2 7 वळी — For 47^{ab}, Ś1 K B2 D3 10 11 T1 2 subst

108* विप्रहीनरथाश्वास्तान्नरान्स पुरुषर्षभ ।

[B2 D10 11 T1 -हीण, D3 -हीना (for -हीन) K5 -रथाश्वां*, D3 रथाश्वास्तान् K5 om the post half K2 D10 11 अवधीत्, B2 निरस्य, D3 नरान् (submetric) (for नरान्स)]

while D4 subst

109* भीमसेनो गदापाणिर्गदया वज्रकल्पया ।

— D1 transp 47^{cd} and 48^{ab} — ^{c}) D1 -साहस्र — ^{d}) Ś1 K1 D4 T2 प(T2 पा)दातान् (for पदातीन्) Ś1 K1 2 समयोधयत्, K3 5 D2 5–7 10 11 समपोथ°, T2 G2 अवपात°, T3 सोप्यपात°, T4 अवपेष°, G1 अवयोध°, M1 अभ्यपोथ° (for अव°) Dn पदातिन स पोथयत्, D1 पादातानामुपस्थित

48 D1 transp 47^{cd} and 48^{ab} — ^{a}) K4 D4 हत्वा तु (D4 त), T3 4 G M2–4 जघान (for हत्वा तत्) — ^{b}) D1 भीमसेनो रराज वै — D1 om 48^{c}–51^{b} — ^{d}) T4 शिखंडी (for नचिरात्) D3 तान्वीरान्प्रत्यपद्यत

49 D1 om 49 (cf v l 48) — ^{a}) K2 Dn D2 4–7 9 10 T4 पदाता M1 चैव (for भूमौ) D3 पदातिनो हता भूमौ — ^{b}) K1 शिच्यिरे, K4 D3 8 T4 शिशिरे, Dn D4 9 शेरते, G3 शसिरे, M गदया (for शिश्यिरे) — B1 reads 49^{c}–50^{d} on marg — ^{c}) Ś1 K T1–3 M1 प्रभग्ना, D8 समाना (for संभग्ना) Ś1 K1–3 त्वथ (for इव) D8 व्यावृत्तं, G1 3 वेगेन (for वातेन) — ^{d}) Ś1 K1–3 पुष्पिता इव किंशुका, K4 5 T1. 2 किंशुका इव पुष्पिता

50 D1 om 50 (cf. v l 48) B1 reads 50 on marg — ^{a}) D5 7 स्रजोद्भूता Ś1 K Dn D3 6 10 11 T1 2 नानाश(Dn D6 °व)स्त्रसमायुक्ता (T2 °क्तान), D4 नानायुद्धसमोपेता — ^{b}) D7 -कुंडळ- — ^{d}) Ś1 K1. 2 D8 -देश्या, K4 देशात् (for -देश-) D4 T3 4 G1. 2 M नानाजनपदेश्वरा (D4 °दाधिपा), G3 °पदजनेश्वरा

51 D1 om 51^{ab} (cf v l 48) B4 damaged for 51–56 — ^{a}) T2 G2 पताक B1 S -सपन्न (for -संछन्न) — ^{b}) K2 पदातानां Ś1 K1–3 बल महत् (by transp), K4 5 D2 4 महाबल (D2 °ळं), D7 महद्बळ — ^{c}) B1 3 5 Dn D5–7 9 निवृत्तं वि-, D1 रणाङ्गणं, M1 निहत हि (for निकृत्तं वि-) B (B4 damaged) Dn D4–11 रौद्रं, D2 घोरं, T3. 4 G M2–4 राजन् (for तत्र) — ^{d}) D2 रौद्र- (for घोर-) B2 D3 10 11 भयावह Ś1 K D1 T1 2 छिन्नं ताल(T2 °ळ)वनं यथा

52 B4 damaged — ^{a}) K3 पुरोगाना D4 10 T3 G M च (for तु) T4 युधिष्ठिर पुरोधाय — ^{b}) Ś1 K B1 2 Dn1 D1 3 4 10 11 T1 2 M1 सह(B2 M1 °र्व)सैन्या (Dn1 °न्य), Dn3 तव सैन्य, T3 G2 सर्वे सैन्य- (for सर्वसैन्य) — ^{c}) B1. 5 Dn1. n2 D2 4 5 7 9 M अन्वधावन् (for अभ्य°) T1 2 महात्मान- (for °नं)

53 B4 damaged — ^{a}) G3 सर्वास् (for सर्वे).

ते सर्वे तावकान्दृष्ट्वा महेष्वासान्पराङ्मुखान् ।
नाभ्यवर्तन्त ते पुत्रं वेलेव मकरालयम् ॥ ५३
तदद्भुतमपश्याम तत्र पुत्रस्य पौरुषम् ।
यदेकं सहिताः पार्था न शेकुरतिवर्तितुम् ॥ ५४
नातिदूरापयातं तु कृतबुद्धिं पलायने ।
दुर्योधनः स्वकं सैन्यमब्रवीद्भृशविक्षतम् ॥ ५५
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु वा ।
यत्र यातान्न वो हन्युः पाण्डवाः किं सृतेन वः ॥ ५६
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ ।
यदि सर्वेऽत्र तिष्ठामो ध्रुवो नो विजयो भवेत् ॥ ५७
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतकिल्बिषान् ।
अनुसृत्य हनिष्यन्ति श्रेयो नः समरे स्थितम् ॥ ५८
शृणुध्वं क्षत्रियाः सर्वे यावन्तः स्थ समागताः ।
यदा शूरं च भीरुं च मारयत्यन्तकः सदा । C 9 1057 B 9 19 61 K 9 18 62

D3.4 M3 तावका —[b]) B1.3.5 D8 9 T4 G1 M महेष्वासा K2 पराङ्मुख, B1 D3 T4 M3 °ङ्मुखा, D4 महारथा (for पराङ्मुखान्) —After 53[b], D4 ins

110* समभ्यधावन्त्वरिता युद्धाय जितकाशिन ।

—[c]) K1 Dn8 D1 T1.2 G2 3 M1.2 अत्यवर्तंत (for अभ्य°) D4 पुत्रेण ते न्यधार्यंत —[d]) D2 7 T2 वेलेव D7 मकरालय D1.5 T3 4 G वेलामिव महोर्मय (D1 महार्णव, D5 पयोदधि)

54 B1 damaged. —[a]) D3 om (hapl.) from पश्याम up to देश प्र (in 56[a]) —[b]) Ś1 K1-3 T1.2 विक्रमं (for पौरुषम्) —[c]) B1 एक, D4 T4 G2 3 M एन (for एकं) —[d]) B2 3 Dn1 D9 अभिवर्तितुं, D2 धनि° (for अति°)

55 B1 damaged D3 om 55 (cf v l 54) —[a]) Dn D1 4 6 7 -दूराश्र (for -दूराप-) D2 -यान, G1 -यानस् (for यात) M1 नातिदूरादिवायात —[b]) K4 5 कृत्वा (for कृत) D2 9 G1 -बुद्धि, D4 8 बुद्धि (for -बुद्धिं) —[d]) K5 व्यब्रवीद् (for अब्र°) T3 भृत- (for भृश) K4 -वीक्षितुं, Dn1 वीक्षत, Dn2 D6 -विक्षत, D2 5 -दुःखित, D1 (marg as in text) -दुःखितं, T4 G3 -वीक्षित (for -विक्षतम्)

56 B1 damaged D3 om up to देशं प्र (cf. v l 54) —[a]) G3 तद् (for त) D5 M3 प्रविश्यामि, G2 प्रपश्याम (for °मि) —[b]) K2 4 Dn D3.4 9 च, T4 [इ]व (for वा) —[c]) K4 5 तत्र (for यत्र) K2 D10 11 वा, Dn वै, S (except T1 2) नो (for वो) —[d]) G1 3 om (hapl) from किं सृतेन up to पाण्डवा (in 58[b]) K4 मृतेन, Dn गतेन, T1.2 द्रुतेन, T3 4 स्थितेन, G2 नु तेन, M3 घृतेन, Ca सृतेन (as in text) D3 वा, D4 च (for व) D1 पाण्डवा किं पलायते

57 G1.3 om. 57 (cf v l. 56) —[a]) D4 अन्य (for अल्प) D7 बलम् Ś1 K1.2 अल्प चैव बलं तेषा —[b]) D8 T3 4 G2 यल (for भृश-) K3 D2 3 5 7 -विक्षितौ, B1 -वीक्षतौ, T2 -दुःखितौ, T3 -शालिनौ, T4 G2 -शालिनौ (for -विक्षतौ) Dn1 कृष्णो चैव बलं क्षितौ, Dn2 n3 कृष्ण च बलविक्षितौ (sic) —[c]) Ś1 K1 2 B5 D2 4 5 T3 M3 प्र, D1 7 [ऽ]पि (for ऽत्र) B1 D9 तिष्ठाम —[d]) K3-5 B D T1.2 G2 M1 ध्रुव D8 वो (for नो)

58 G1.3 om. up to पाण्डवा (of v l 56) D6 reads 58[a]-59[a] twice —[a]) D1 पलायितास्, D4 व्यपयानास् (for विप्रयातांस्) D3 तु च, T2 3 G2 M तु नो, T4 ततो (for तु वो) D6 (both times) [ऽ]मित्रान्, T3 4 G2 हन्यु (for भिन्नान्) —[b]) T2 पाण्डवान (for पाण्डवा) B Dn D2 5 6 (first time) 8 9 T3 4 G1.3 M3.4 किल्बिषा, D10 -विक्रिया, D11 विप्रिया (for किल्बिषान) —[c]) T1 अनुव्रज्य, T2 °सृज्य, T3 G1.3 M4 याय (for °सृत्य) T3 4 वधिष्यति, G1.3 वधिष्यंत, M3 [आ]हनिष्यति (for हनि°) G2 अभियाम विजेष्यत —[d]) D10 11 T4 G M2-4 श्रेयान्न, M1 श्रेयास्तत् (for श्रेयो न°) K4.5 T1 2 स्थिति, Dn D1 3.6 (both times) 7 (marg, orig as in text) 10 11 T3 4 G M वध (for स्थितम्)

59 For the repetition in D6, of v l. 58 —[a]) D1 3 10 11 T1 2 G3 शृण्वतु (for शृणुध्व) —[b]) D1 वचन (for यावन्त°) K3 B1-3 Dn D2 3.5-11 [ऽ]त्र, B4 5 वै, D1 मे, T1 2 ते, G2 तु, M4 स्यु (for स्थ) —[c]) D1.7 (marg, sec m) नित्यं, T1 2 यत, T3.4 G1 3 M यदि, G2 युधि (for यदा) Ś1 K1-3 transp शूर च and भीरुं च M1 शूरश् (for शूरं) D4 9 भीमं, T3 4 भीष्म (for भीरुं) —[d]) M3 मानयति (for मार°) K4 5 समं; T3 G M यम (for सदा) T4 मारयिस्वाथ कौसलं —[e]) K3 कोन्यो; K4 के तु; B2 कोत्र, D4 को न, M1 कोय (for को तु) K4 मूढा M3 तु (for न) D4 M1 युध्येत (for

C 9 1037
B 9 19 62
K 9 18 63

को नु मूढो न युध्येत पुरुषः क्षत्रियब्रुवः ॥ ५९
श्रेयो नो भीमसेनस्य क्रुद्धस्य प्रमुखे स्थितम् ।
सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम् ।
जित्वेह सुखमाप्नोति हतः प्रेत्य महत्फलम् ॥ ६०
न युद्धधर्माच्छ्रेयान्वै पन्थाः स्वर्गस्य कौरवाः ।
अचिरेण जिताँल्लोकान्हतो युद्धे समश्नुते ॥ ६१
श्रुत्वा तु वचनं तस्य पूजयित्वा च पार्थिवाः ।
पुनरेवान्ववर्तन्त पाण्डवानाततायिनः ॥ ६२
तानापतत एवाशु व्यूढानीकाः प्रहारिणः ।
प्रत्युद्ययुस्तदा पार्था जयगृध्राः प्रहारिणः ॥ ६३
धनंजयो रथेनाजावभ्यवर्तत वीर्यवान् ।
विश्रुतं त्रिषु लोकेषु गाण्डीवं विक्षिपन्धनुः ॥ ६४
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महाबलः ।
जवेनाभ्यपतन्हृष्टा यतो वै तावकं बलम् ॥ ६५

इति श्रीमहाभारते शल्यपर्वण्यष्टादशोऽध्यायः ॥ १८ ॥

युध्येत) D1 को न युध्येत वै मूढो —f) D1 मानव (for पुरुष) K3 D3 क्षत्रियव्रत , K4 5 B D4 9 10 11 T1 क्षत्रियो ध्रुव (D4 10 11 T1 °वं), Dn D3 5 7 °यं ब्रुवन्, D6 °याधम , T4 °यर्षभ, G3 °यब्रवीत् (sic) (for °यब्रुव) D8 पुरुषा क्षत्रिया ध्रुव

60 a) T3 G3 श्रेयान् (for श्रेयो) M मे (for नो) —b) D11 कृष्णस्य , T2 समरे , M1 सयुगे (for क्रुद्धस्य) K5 D10 11 [अ]भिमुखे (for प्रमुखे) K5 T1 4 G M1. 3 4 स्थिति , T3 M3 स्थित (for स्थितम्) —c) K4 5 B5 D1 6 7 M2–4 सुखं, D3 शूरस्य (hypermetric), T1–3 G2 मुख्य , G1 दु खं, G3 दु ख (for सुख) K2 4 5 B2 5 Dn D3–5 संग्रामि(D3 °म)को —d) M युध्यत (for °ताम्) T G दु खो व्या(T4 G2 °सव्या) धिजरादिभि (T4 °युर्ज, G1 °दिज , G2 °दिजात्, G3 °युज) — After 60^d, D9 T G ins

111* मर्त्येनावश्यमर्तव्ये गृहेष्वपि कदाचन ।
युध्यत क्षत्रधर्मेण मृत्युरेष सनातन ।
[(L 1) G1 मर्त्यैर् (for मर्त्येन)]

—e) D10 11 हत्वा , G2 जितो (for जित्वा) T2 वा, G3 [s]त्र (for [इ]ह) —f) K3 हत्वा (for हत) B (except B2) Dn D5 6 8 9 महाफ(D8 °ब)ल, T1. 2 महद्यश , M3 °द्बल (for °त्फलम्)

61 a) M1 4 योध , M2 यौध- (for युद्ध-) D4 T3 श्रेयोन्य , M3 श्रेयो वै (for श्रेयान्वै) —b) T1 2 भारत (for कौरवा) — D2 om (hapl) 61^c–62^b —c) K2 सुचिरेण K3 4 5 D4 10 [अ]जिताँल्, K3 B (except B2) Dn D3 5–9 11 T1 3 4 G1 3 [ए]व ताँल्, D2 [अ]क्षयाँल्, G2 [अ]पि ताँल्; M1 शुभाँल् (for जिताँल्) —d) B1, 5 Dn D5, 6, 9 हता; B2 हत्वा; D8 M1 हते, D8 हतान् (for हतो) T2 युद्धात्, M3 युद्धं (for युद्धे) B (except B2) Dn D3 5–9 ह्यवाप्स्यथ (Dn1 D8 °त) (for समश्नुते)

62 D2 om 62^{ab} (cf v 1 61) —a) D3 M3 च, D10 11 G3 तद् (for तु) —b) K4 D4 T G M1 तु (for च) D8 पार्थिवं —c) K3 B1 2 D10 11 S [अ]भ्यवर्तंत, K4 D8 [अ]नुव°, Dn D4 6 न्यव° (for [अ]न्वव°) —d) D1 पाडवान्प्रति सगरे

63 b) T3 व्यूढा वीरा (for व्यूढानीका) — K3 om. (hapl) 63^{cd} —c) K2 पुनरवास् (sic), D1. 8 अभ्युद्ययुस् (for प्रत्युद्य°) B1 D9 तत , Dn1. n2 D6 7 तथा (for तदा) D4 T3 पार्थान्, D8 पार्थौ (for पार्था) —d) M1 जये (for जय-) K2 B D1 3. 4 6–11 T1 G1 M1. 2 गृद्धा , G3 -गृद्ध (for -गृध्रा) K3 4 5 B D T1 2 प्रमन्यव , M3 प्रधारिण (for प्रहा°)

64 D1 om from 64 up to the end of the adhy —a) G1 3 [आ]शु (for [आ]जाव्) —b) D4 T3 4 G M संन्य(T3 न न्य)वर्तत (for [अ]भ्य°) —d) K4 5 B2 व्याक्षिपद्, B3 व्याक्षिपन्, D9 प्राक्षिपद् (for विक्षिपन्) K3 Dn D2 3 5–7 10 11 व्याक्षिपन्गाण्डि(Dn1 n2 °न्गाडी , D2 3 °न्नाढि-, D5 °न्गाजि-, D7 °न्गाजी)व धनु

65 D1 om 65 (cf. v 1 64) —a) D3 om , D4 M1 तु (for च) D6 माद्रीशकुनिपुत्रौ च —b) D3, 9 महाबल , D7 °बळ , G2 M °रथ (for °बल) —c) D3 रथेन (for जवेन) K4 5 हृष्टो , B1 3 D8 9 वीरा , B4 5 पार्था , D3 T1 3 दृष्ट्वा (for हृष्टा) Dn D2 5–7 जवेनाभ्यद्रवन्तू(D5–7 °वंस्तू)र्णं; D4 °भ्यद्रवन्हृष्टा; T4 तथैवाभ्याश्च संहृष्टा; M2–4 जवेनाभ्यपतन्हृष्टो. —d) K3

१९

संजय उवाच ।
संनिवृत्ते बलौघे तु शाल्वो म्लेच्छगणाधिपः ।
अभ्यवर्तत संक्रुद्धः पाण्डूनां सुमहद्बलम् ॥ १
आस्थाय सुमहानागं प्रभिन्नं पर्वतोपमम् ।
दृप्तमैरावतप्रख्यममित्रगणमर्दनम् ॥ २
योऽसौ महाभद्रकुलप्रसूतः
सुपूजितो धार्तराष्ट्रेण नित्यम् ।
सुकल्पितः शास्त्रविनिश्चयज्ञैः
सदोपवाह्यः समरेषु राजन् ॥ ३
तमास्थितो राजवरो बभूव
यथोदयस्थः सविता क्षपान्ते ।
स तेन नागप्रवरेण राज-
न्नभ्युद्ययौ पाण्डुसुतान्समन्तात् ।
शितैः पृषत्कैर्विददार चापि
महेन्द्रवज्रप्रतिमैः सुघोरैः ॥ ४
ततः शरान्वै सृजतो महारणे C. 9 1070 B 9 20 5 K 9 19 6

B2.10 11 T1 2 यत्ता वै, K5 यत्तो वै, Dn यस्ततस्, D2 5–7 यत(D2 °स, D6 त्ता)स्तु, T3 4 यत्तु वै, G2 योद्धु वै (for यतो वै) D2.7 बळ

Colophon om. in D1 —*Adhy name* Ś1 K बलनिवर्तन, T1 2 दुर्योधनवाक्यं, M2–4 बलोपस्थापनं —*Adhy no* (figures, words or both) B5 D10 11 (marg) S 19, Dn D4 18 (as in text) —*Sloka no* Dn1 67, Dn3 66, D5 69

19

1 ^{a}) Ś1 K1 D1 8 10 11 जनौघे, D4 रथौघे (for बलौघे) T3 योधेषु संनिवृत्तेषु, T4 G M2–4 संनिवृत्ते (M3 °वर्ते)षु यौधे(T4 योधे, G1 3 सैन्ये-, G2 कुरु)षु —^{b}) S साल्वो B3 D10 -जनाधिप (for -गणा°) —^{c}) K3 अभिवर्तत, K4 5 M2–4 अभ्यद्रवत, B (except B3) D3 9 °धावत, D1 4 T3 4 G M1 °द्रवत्सु- (for °वर्तत) K4 5 संहृष्ट (for संक्रुद्ध-) —^{d}) K3 B1 D5–7 G3 सुमहा, Dn च महा (for सुमहद्) Dn1 -बल, D7 -बळ (for बलम्) B2 D2 10 11 T2 M1 पाण्डवाना महद्बल

2 ^{a}) G2 प्रस्थाय (for आ°) T2 M3 च, M1.2 4 म (for सु-) D6 -भाग (for नागं) —^{c}) T2 हृष्टम् (for दृप्तम्) K4.5 B3 Dn D1–3.5–9 ऐरावण- (for °वत) D4 ऐरावतगजप्रख्यम् —^{d}) D10 मर्दन

3 ^{a}) K2–4 B Dn D2 4 5 7 9–11 T2–4 G महान्, D3 महद्- (for महा) B4 5 सत्र, M पद्म (for भद्र) K5 B1 2 4 5 D9 -कुले, Dn कुल, D2 7 -कुळ, G1.3 -कुरु (for -कुल) Dn प्रसंस्तुत (for -प्रसूत) —^{b}) D4 स, T2 प्र, T4 स (for सु) D4 धार्तराष्ट्रस्य, T2 धृतराष्ट्रेण, T4 धर्म° (for धार्त°) —K4 om 3^{c}–4^{b} —^{c}) D2 M1 सुकल्पितं, M3 संकल्पित (for सुक) K2 D1 9 शस्त्र (for शास्त्र) D1 -परपराभि, D9 विनिश्चितज्ञै- (for श्चयज्ञै-) —^{d}) Dn1 n2 सदोपवाह्यै Dn3 D2.6 7 सदोपवाह्यै-, M1 वाह्यं (for °वाह्य) T3 [s]तुमतश्च राज्ञ-, T4 G1 3 M सततं च राज्ञ-, G2 स मतश्च राज्ञ- (for समरेषु राजन्) D1 7 (marg, *sec m*) परैरजेय समराङ्गणेषु ❀ Cv (reading सदौपवाह्य सततं च राज्ञ) औपवाह्य राजारोहणयोग्यो गज । ❀ —S *ins after* 3 D4 *after* 5

112* ऐरावत दैत्यगणान्विमृद्न
न्शक्रो यथा संजनयन्भयानि ।

[(L 1) M1 विमृश्नन्, M3 °मर्दन्(for °मृद्नन्) D4 ऐरावतो दैत्यचमूं विमृद्य —(L 2) D4 शक्रप्रयुक्तो (for शक्रो यथा स) T4 जहाति (for भयानि)]

4 K4 om 4^{ab} (cf v l. 3) D1 om 4^{ab} D6 7 om (hapl) 4^{abc} —^{a}) S (except T1 2) समास्थितो (for तमा°) D3 नाग- (for राज-) —^{b}) D4 यथोदसंस्थ- B D3 9 तपांते (B5 °पास्ते) (for क्षपान्ते) —^{c}) D9 जघ्नन् (for राजन्) —^{d}) D4 विरोययौ (sic), D7 अभ्युद्ययु (for °द्ययौ) K4.5 D1.4.5 7 T G समस्तान्, Dn D3 6 10 11 समेतान्, M समस्त्यान् (for समन्तात्) —D1 om 4^{ef} —^{e}) Ś1 K1 3 B5 D5 10 11 सितैः, K4 5 M1 शरै, Dn सिक्तैः, D3 शिरैः, D4 शतै, D6 स सैः (for शितै) Ś1 K1 पृषक्तैर्, D3 पृथक्तैर्, D4 प्रपक्तैर्; T3 प्रपत्कैर् (for पृ°) Ś1 K D3 विसुतोद, T3 °दधार; G M °रराद (for °ददार), K5 D3.6 वापि, D10, 11 वेगैर्, G2 चाजौ (for चापि).

C. 9. 1070
B. 9. 20. 5
K. 9. 19. 6

योधांश्च राजन्नयतो यमाय ।
नास्यान्तरं ददृशुः स्वे परे वा
यथा पुरा वज्रधरस्य दैत्याः ॥ ५
ते पाण्डवाः सोमकाः सृञ्जयाश्च
तमेव नागं ददृशुः समन्तात् ।
सहस्रशो वै विचरन्तमेकं
यथा महेन्द्रस्य गजं समीपे ॥ ६
संद्राव्यमाणं तु बलं परेषां
परीतकल्पं विबभौ समन्तात् ।
नैवावतस्थे समरे भृशं भया-
द्विमर्दमानं तु परस्परं तदा ॥ ७
ततः प्रभग्ना सहसा महाचमूः
सा पाण्डवी तेन नराधिपेन ।
दिशश्चतस्रः सहसा प्रधाविता
गजेन्द्रवेगं तमपारयन्ती ॥ ८
दृष्ट्वा च तां वेगवता प्रभग्नां

— ^{f}) Dn2 om from महेन्द्र up to तत (in 5^{a}) Dn1 n8 -चाप (for -वज्र)

5 Dn2 om तत (cf v l 4) — ^{a}) G1 2 गजान्, M1 तु तान् (for शरान्) D3 10 वै विसृजन्, G1 2 वेगवतो (for वै सृजतो) D4 विमुंचतस्तस्य रणे महाशरान् —D6 repeats 5^{b}–6^{a} after 6^{c} — ^{b}) M योधांश् Ś1 Dn1 n8 D10 यमालयं, Dn2 महारणे, D4 T3 4 G M यमक्षयं (for यमाय) —For 5^{ab}, D1 subst (reading it after 6)

113* तत शरान्वै सृ[ज]ता नृपेण
योधा समस्ता गमिता यमालयम् ।

— D1 om 5^{cd} — ^{c}) B6 M1 नान्यातर, Dn न तस्यांत (for नास्यान्तर) D8 T4 च (for वा) — ^{d}) D3 वज्रधरेण (for °धरस्य) —After 5, Ś1 K B Dn D2 8 5–11 ins

114* ऐरावणस्थस्य चमूविमर्दे
दैत्याः पुरा वासवस्येव राजन् ।

[(L 1) D7 चमूर्विदार्ये (for °विमर्दे) B D5 9 ऐरावण (B2 °त)स्येव चमू विमृद्र(B5 °सन्व)तो —(L 2) Dn D5 6–7 यथा (for दैत्याः)]
while D4 ins 112*

6 For the repetition in D6, cf v l 5 — ^{a}) K4 5 B D3 4 8 9 M2 सोमकसृंजयाश्; Dn D6 (both times) T1 2 4 G सृंजया सोमकाश् (by transp), D5 7 T8 सृंजयसोमकाश् — ^{b}) K3–5 B (except B2) Dn D2 8 5–7 (marg as in text) 8–11 T4 एक (for एव) D1 शरौघान् (for समन्तात्) — Ś1 K1–3 M1 om (hapl.) 6^{c}–7^{b} — ^{c}) D4 सं संघशो (for सहस्रशो) D1 विकिरतम्, G2 प्रच° (for विचरन्तम्) D8 एके (for एकं) —K4 om. 6^{d}–7^{c}. — ^{d}) D6 गजेंद्रस्य, M8 सुरेंद्रस्य (for महेन्द्रस्य) D2 (sup lin as in text) वज्र (for गजं) B D1 4 5 10 T1 2 G2 समीके, D7 समग्रं (for समीपे) — After 6, D1 reads 113*

7 Ś1 K1–3 M1 om 7^{ab}, K4 om 7^{abc} (for both, cf v l 6) D1 om 7^{ab} — ^{a}) Dn D2 4 7 T4 विद्राव्यमाण (D3 °नं); D2 - तद्राव्य°, D6 विविध्य°, D2 स द्राव्य°, T2 संप्राप्य°; T8 संग्राम्य° (for संद्राव्य°) K5 तु बले, D4 च बलं, D7 तु बलं, T3 तुमुलं (for तु बलं) Dn1 प्रवेशात् (for परेषां) — ^{b}) Dn1. n8 काल्म(Dn2 °ल)घातमिव, Dn8 D1 भनवकल्पं; S (M1 om) परेत° (for परीत°) D3 विभवं; D4 च बभौ, G2 विभिदे (for विबभौ) D10 11 T4 समंतत (for समन्तात्) — Dn D5 5–7 transp 7^{c} and 7^{d} — ^{c}) K5 D11 T3 4 G M च (for [ए]व) M [अ]वतस्थु K3 B5 T3 समरं (for समरे) D2 भृताम्, D5 स (for भयाद्) B2 नैवावतस्थे भृशा भयाय (submetric) — ^{d}) B1 3–5 D5 9 विमृद्यमान, B2 D1 6 7 (marg, sec m) 11 T1 विमर्द°, D2 5 7 आक्रम्यमाण, T8 विदर्दमानं, M विमर्दमानास् (M3 °नस्) (for °मानं) K3 भयात्, T8 तथा, T4 यदा, G2 तद् (for तदा) D1 7 (marg, sec m) बल (D7 °ले) पलायित (for परस्पर तदा) D4 निद्राव्यमाणा हि गजेन तेन वै

8 ^{a}) B2 तदा हि (for तत प्र-) D8 T2 तदा चमूः; D4 चमूस्तदा (for महाचमूः) — ^{b}) D4 S (except T1 2) जनाधिपेन (for नरा°) — ^{c}) D8 10 11 विधाविता, T2 प्रयापिता (for °धाविता) — K2 8 om (? hapl) 8^{d}–9^{a} — ^{d}) D3 om (hapl) from ग up to वे (in 9^{a}) Ś1 -वंशं (for -वेगं)

9 K2 8 om 9^{a}, D3 om up to वे (in 9^{a}) (for both, cf v l 8) — ^{a}) Dn D6 ह, D4 T1 2 तु; D5 7 हि, T8 om (for च). T3, 4 G2, 3 M तान् (for

सर्वे त्वदीया युधि योधमुख्याः ।
अपूजयंस्तत्र नराधिपं तं
दध्मुश्च शङ्खाञ्शशिसंनिकाशान् ॥ ९
श्रुत्वा निनादं त्वथ कौरवाणां
हर्षाद्विमुक्तं सह शङ्खशब्दैः ।
सेनापतिः पाण्डवसृञ्जयानां
पाञ्चालपुत्रो न ममर्ष रोषात् ॥ १०
ततस्तु तं वै द्विरदं महात्मा
प्रत्युद्ययौ त्वरमाणो जयाय ।
जम्भो यथा शक्रसमागमे वै
नागेन्द्रमैरावणमिन्द्रवाह्यम् ॥ ११
तमापतन्तं सहसा तु दृष्ट्वा
पाञ्चालराजं युधि राजसिंहः ।
तं वै द्विपं प्रेषयामास तूर्णं
वधाय राजन्द्रुपदात्मजस्य ॥ १२
स तं द्विपं सहसाभ्यापतन्त-
मविध्यदर्कप्रतिमैः पृषत्कैः ।
कर्मारधौतैर्निशितैर्ज्वलद्भि-
र्नाराचमुख्यैस्त्रिभिरुग्रवेगैः ॥ १३
ततोऽपरान्पञ्च शितान्महात्मा
नाराचमुख्यान्विससर्ज कुम्भे ।
स तैस्तु विद्धः परमद्विपो रणे
तदा परावृत्य भृशं प्रदुद्रुवे ॥ १४
तं नागराजं सहसा प्रणुन्नं C 9 1081 B. 9 20 16 K 9 19 16

ता) K4 5 B Dn D2 4–6 8–11 T3 वेगवर्ती (Dn3 D9 °ती), M1 3 4 वत (for वता) Ś1 K1 प्रधाविता, T3 4 G2 3 M प्रमभ्रान् (for °भ्रा) — b) G1 3 कुरु (for युधि) M योधमुख्या — c) D4 स्वपूजयस् (for अपूज) D2 10 11 से तु, D3 ते च, T1. 2 तं च, M2 तेत्र (for तत्र) Dn D5 S (except T1 2) जनाधिप (for नरा) K2 T1. 4 G2 तदा, D2 M2–4 ते, D8 च (for त) B D8 9 संपूजयतस्तु (B3 4 श्च) नराधिप ते (B2 3 त) — d) B D8 9 शखान्प्रदध्मु°, D4 6 दध्मुश्च शखं (for °श्च शङ्खाम्) K4 5 शशिन॰ प्रकाशान्, B1 शशिप्रनिभास्तान्, Dn D6 7 हिम(D7 दधि)हारगौरान्, D4 T3 4 G M शशिहार(D4 कुंद-, T4 भास)गौरान् (for °संनिकाशाम्)

10 a) G2 निनादास् (for °द) T2 स्वयि (for त्वय) — b) D1 हस्ताद् (for हर्षाद्) K4 5 D3 G2 विमुक्तान् (for °क्तं) T3 4 G2 स्वय (for सह) T1 2 सैन्य- (for शङ्ख) K4 5 -मुक्तै, T3. 4 G M -नादै (for -शब्दै) — d) K4. 5 B1 4 D3 5 पचाल-, D7 पाचाळ D1 राजो (for -पुत्रो) K4 Dn D2 3 5–7 11 T1 2 ममृषे न (for न ममर्ष) K3 B D2 3 कोपात्; D4 M1 राजन्, D10 भापता (for रोषात्)

11 a) D4 स (for तु) — b) Dn1 जवेन (for जयाय) — D1 om 11cd — c) Dn2 जृंभो, D8 वृत्रो (for जम्भो) Dn D5 -समागमेन, T3 4 G °स्थितं वै (T3 वा) (for °गमे वै) D6 7 तथा (for वै) — d) Dn D3 5–7 S ऐरावतम् K1 D9 इंद्रवाह

12 a) B D2 4 8 9 च दृष्ट्वा, Dn D5–7 T4 G1. 3 M निरीक्ष्य, T3 G2 समीक्ष्य (for तु दृष्ट्वा) — b) K4 पचाल, D7 पाचाळ- Ś1 K D1. 3. 4 10 11 T1. 2 4 -पुत्रं (for राज) K3 युध-, D10 11 युव- (for युधि) D2 शाल्व (for राज) B5 Dn1 D8 T2–4 M2–4 सिंह, D4 पुत्रं (for सिंह) — c) M1 स (for त) Dn3 प्रेरयामास, M1 प्रेषयदत्र (for °यामास) — d) Dn D5 तत स राजा, D3. 6 7 वधाय राजा (D3 राजेंद्र) (for °य राजन्) Dn D4. 6 द्रुपदात्मजाय

13 a) G1 3 ह (for त) Dn D5–7 नृप (for द्विप) K4 चाभ्युपेतम्, Dn D5 7 T1–3 M2–4 ह्यापतंतम् (for [भ]म्या) K5 स त द्विप वै सहसाभ्युपेतम्, D3 10 11 स त द्विपेंद्र सहसापतंतम् — b) D4. 9 आविध्यद्, T1 2 ह्य (for अ) K1. 3 B D3 6 8–11 अग्नि (for अर्क) Ś1 K1 पृपक्कै, D9 शरौवै (for पृषत्कै) T4 सविद्यु-दर्कप्रतिमै॰ पृषत्कै — c) K2 corrupt D1 अस्युग्रवेगैर्, D4 कर्मारधूतैर्, S तं तैलधौतैर् (for कर्मार) — d) Dn अग्र-, D1 एव, D6 7 अग्र्य- (for उग्र-) K2 -कल्पै, Dn D5–7 -हस्तै, D1 वीर, T1 2 G1 -हस्त, T3 -वाहा, T4 G2 3 M -हस्त (for -वेगै)

14 a) K3 B4 Dn D4 5 7 11 T1 2 M1 शतान् (for शि) D4 रणे वै (for महात्मा) D2 ततस्तु पाचाळ सुतो महारणे — b) Dn1 D6 -वर्षान्, Dn2 n3 D5 7 -वर्यान् (for मुख्यान्) D6 अविसस्त- (for विससर्ज) G3 कुम्भै (for कुम्भे) — c) K4 5 सु, B2 च (for तु) D3 4 परमो, T3 परमैर् (for परम-) — d) S

C 9 1061
B 9 20 16
K 9 19 16

विद्राव्यमाणं च निगृह्य शाल्वः ।
तोत्राङ्कुशैः प्रेषयामास तूर्णं
पाञ्चालराजस्य रथं प्रदिश्य ॥ १५
दृष्ट्वापतन्तं सहसा तु नागं
धृष्टद्युम्नः स्वरथाच्छीघ्रमेव ।
गदां प्रगृह्याशु जवेन वीरो
भूमिं प्रपन्नो भयविह्वलाङ्गः ॥ १६
स तं रथं हेमविभूषिताङ्गं
साश्वं ससूतं सहसा विमृद्य ।
उत्क्षिप्य हस्तेन तदा महाद्विपो
विपोथयामास वसुंधरातले ॥ १७
पाञ्चालराजस्य सुतं स दृष्ट्वा
तदार्दितं नागवरेण तेन ।
तमभ्यधावत्सहसा जवेन
भीमः शिखण्डी च शिनेश्च नप्ता ॥ १८
शरैश्च वेगं सहसा निगृह्य
तस्याभितोऽभ्यापततो गजस्य ।
स संगृहीतो रथिभिर्गजो वै

नदन् (for तदा) M2 4 दिश्न, M3 दिश (for भृश)

15 K4 reads and K5 D2 repeat 15[ab] after 19 — [a]) T4 स वेद- (for तं नाग) Dn D5 7 तरसा, D4 परत, G2 प्रहसन् (for सहसा) — [b]) Ś1 K1 2 D3 G3 विद्राव्यमान D2 (first time) 8 4 विनिगृह्य, D2 (second time) सहसा च, D10 11 विनिवर्त्य, M2-4 तु निगृह्य (for च नि°) Ś1 K2 D7 S (except T4) साल्व, Dn D0 शाल्व, D2 (both times) संरब्धे (for शाल्व) — [c]) K4 5 D4 T2 8 तत्राकुशै, Dn1 n3 D1 6 तीव्रा° — [d]) K4 5 B (except B1) D1 8 5 7 9-11 पचाल (D1 °स्य, D7 °ळ), D2 पाचाळ K4 6 Dn D1 5 7 10 S सुत, D0 सुत (sic) (for रथ) Dn D6 प्रहृष्ट, D1 4 7 T2 M8 °दृश्य, D10 11 °हस्य, T1 G1 °दर्श्य (for °दिश्य)

16 [a]) M1 तम् (for दृष्ट्वा) D0 स नाग, T3 4 G M2-4 गजेंद्रं, M1 निरीक्ष्य (for तु नाग) — [b]) T8 धृष्टद्युम्न (for °म्न) Ś1 K2 सरथ, K1 D3 G2 8 स रथात्; K4 6 (marg as in text) D0 सहसा, D2 स्व रथम् (for स्वरथात्) Dn D0 शीघ्रगाद्य, G2 भीमवेग (for शीघ्रमेव) M1 पांचालपुत्र स्वरथात्पपात — [c]) Ś1 K1 गज, K2 8 रथं (for गदा) T1 2 गृहीत्वा (for प्रगृह्य). Dn D3 5 6 7 (orig, marg sec m as in text) T4 [श्र]थ, D10 [ज]प्र-, T1 2 सु (for [श्रा]शु) D1 7 (marg, sec m) बलेन (for जवेन) G2 शूरो (for वीरो) — [d]) K4 5 M भूमौ D1 प्रपातो (for प्रपन्नो) D8 भुवि (for भय) D6 विह्वलाग, D7 विह्वळांग

17 D0 reads 17[a] twice. — [a]) T8 सकूबर (for स तं रथं) B1 हैम D4 विचित्रभास (for विभूषिताङ्गं) — [b]) T8 G2 साल्व (for साश्व) Ś1 K1 प्रमृष्य, K2 प्रपद्य, Dn1 विसृज्य, Dn2 D5 7 (orig) विसृत्य; Dn8 D10 11 निकृत्य, D1 7 (sup lin) T1 2 विगृह्य, D2 3 T4 वि(D2 प्र)मृज्य, D4 यमेज, D6 विमुच्य, T8 G2 विभिद्य, G1 [श्र]त्रमृद्य, G3 [श्र]वमर्द्य (for विमृद्य) — [c]) D10 नदन, T4 तथा (for तदा) T8 बलाद् (for -द्विपो) B D2 8 9 11 उत्क्षिप्य हस्तेन महाद्विपोपि (D2 °पो वै, D11 °पोथ) — [d]) T1. 2 स पोथयामास, T8 व्यपाद°, G व्यपोथ° (for विपोथ°) D2 वसुधराया, D7 T2 °धरातळे, D8 °धरातलं

18 [a]) K4 5 B2 4 D3 10 पचाल-; D2 7 पांचाळ Ś1 K1-3 सुत, B5 सुय, M1 सुतास् (for सुत) K4 5 B Dn D6-9 स, D1-8 10 11 च, S (except T1 2) तु (for स) — [b]) K4 5 Dn D4 · · S (except T1. 2) तथा, D2 स (for तदा) B5 [श्र]र्पित, D2 मर्दितं (for [श्र]र्दि°) D3 9 चरेन (for वरेण) — [c]) Ś1 K1 2 Dn D1 4 7 समभ्यधावत् (Dn D4 5. 7 °वन्), K4 5 तमभ्यधावन्, B3 5 D0 °न्वधावत्, D2 6 M2 °भ्य धावन (for °भ्यधावत्) Dn D5-7 महता (for सहसा) T8 4 G2 महायत्नो (for जवेन) — [d]) D1 शनेश् (for शिनेश्)

19 [a]) B5 शनैश् (for °रैश्) D3 विगृह्य, D4 नि गृह्य त (for निगृह्य) — [b]) D8 4 [श्र]भीतो (for °भितो) K1 4 B4 5 D6 10 11 T3 G2 व्यापततो, B1 D8 5 (sup lin) 8 9 T1 2 4 G1 8 M2-4 द्याप°, D1. 7 [s]त्यु(D7 °भ्यु)त्प (for ऽभ्याप°) Dn D5 6 निगृह्य, D8 गजेभ्य (for गजस्य) D2 तस्याहवे वेगवतागतस्य — [c]) D8 स त गृहीतो, T1 समागृ°, T2. 3 सम गृ° (for स सगृ°) D2 गजौघैश्, S (except T1 2) गजें द्रश् (for गजो वै) D4 स सगृहातोय गजश्चतुर्भिश् — [d]) Ś1 K1 2 5 B1 D6 9 वै (for वैर्) D4 कीर्य माणस, G2 पाल्यमानश् (for वार्यमाणश्). Ś1 K1 स;

चचाल तैर्वार्यमाणश्च संख्ये ॥ १९

ततः पृषत्कान्प्रववर्ष राजा

सूर्यो यथा रश्मिजालं समन्तात् ।

तेनाशुगैर्वध्यमाना रथौघाः

प्रदुद्रुवुस्तत्र ततस्तु सर्वे ॥ २०

तत्कर्म शाल्वस्य समीक्ष्य सर्वे

पाञ्चालमत्स्या नृप सृञ्जयाश्च ।

हाहाकारैर्नादयन्तः स युद्धे

द्विपं समन्तात्तुरुधुर्नराग्र्याः ॥ २१

पाञ्चालराजस्त्वरितस्तु शूरो

गदां प्रगृह्याचलशृङ्गकल्पाम् ।

असंभ्रमं भारत शत्रुघाती

जवेन वीरोऽनुससार नागम् ॥ २२

ततोऽस्य नागं धरणीधराभं

मदं स्रवन्तं जलदप्रकाशम् ।

गदां समाविध्य भृशं जघान

पाञ्चालराजस्य सुतस्तरस्वी ॥ २३

स भिन्नकुम्भः सहसा विनद्य

मुखात्प्रभूतं क्षतजं विमुञ्चन् ।

पपात नागो धरणीधराभः

C 9 1090
B 9 20 25
K 9 19 25

K2 सु-, K3 Dn D5 7 T4 स, D4 तु (for च) T4 सवे, M संखे (for सख्ये) K4 चचाल नैवासमयाणसख्ये, D1 7 (marg, sec m) विचुक्षुभे समरे हन्यमान, D2 तैर्वार्यमाणश्च चचाळ सख्ये, G1 3 चचाल तैर्वार्यमाणोत्मसखे (G3 °घे) — After 19, K4 reads and K5 D2 repeat 15[ab]

20 [a]) K4. 5 शूर° (for तत) Ś1 K1. 3 पृषक्कान्, K2 पृषत्क, B5 पृयक् (submetric), D2 पृषत्कै, D4 प्रपत्कै (for पृषत्कान्) D4 स (for प्र) D2 4 राजन् (for राजा) T3 4 G2 तत पृषत्कानसृजत्स साल्वो — [b]) T3 4 रविर् (for सूर्यो) K4 5 B D2 9 रश्मिजालैं (D2 °ळै), D7 °जाळ, D3 रथजालै, T1 (s/lin as in text) 2 रश्मिशतं (for °जालं) — [c]) K3 B D2 6 8–10 T1 2 G2 तैर्, K4 5 ते च (for तेन) D2 ह्याशुवेगैर् (for [आ]शुगैर्) Dn D5–7 वार्यमाणा (for वध्यमाना) D4 रथावान् — [d]) K4 5 तत्रैव, B ततश्च, Dn D2 6–7 T2 3 G2 3 तत्र (D2 G3 °त) स (for ततस्तु) Ś1 K1. 3 सख्ये (for सर्वे) D1 3 10 11 प्रदुद्रुवु सहितास्तत्र सत्र, T4 M1 प्रदुद्रुवुस्तत्रसुश्चैव (M1 °स्तत्र) सर्वे

21 D10 reads 21 twice. — [a]) B2 ततस्तु (for तत्कर्म) K2 B2 S साल्वस्य Ś1 K1 2 D1 समीक्ष्य सख्ये, K4 5 °क्ष्यमाणा, Dn D4–7 S (except T1 2) निरीक्ष्य सर्वे (for समी°) — [b]) K4 5 B1–3 D9 10 (both times) 11 पचाल-, D2 7 पाचाळ- Dn D1. 6 T1. 2 मुख्या, D10 (both times) 11 -पुत्रा, T4 G2 -मात्स्या (for -मत्स्या) Ś1 K2 Dn D3 सजयाश्च — [c]) D3. 10 (both times) 11 हाहाकारान्, T3 °कार B4 D10 (both times) 11 नादयंति, Dn T3 4 G2 नर्द(Dn1 °द)-यत° (for नाद) B1 D1 9 सुयुद्धे, B3 D3 6 च युद्धे, Dn D5–7 च सेना, T1 2 तु युद्धे, T3 4 G M2 4 समीपे (M3 °के) (for स युद्धे) D4 हाहाकाराश्चर्दतश्चापि राजन्, M1 हा हा हता स्मेति च ते वदन्तो — [d]) M1 गज (for द्विप) B4 5 दुद्रुवुर्, T3 4 दुद्रुवुस्ते (T4 °वैं), G2 ददृशुस्ते, M1 ममथुर् (for रुरुधुर्) D1 7 (marg sec m, orig as in text) शरौघै°, D4 समस्तान् (for नराग्र्या) D3 त नागमुख्य रुरुधुर्नराग्र्या

22 [a]) K4 5 B1 5 D10 11 पचाल, D7 पाचाळ D3 9–11 T1. 2 G1 पुत्रस् (for -राजस्) B1 3 D3 5 7 9 च, T3 4 G स (for तु) D4 पाचालराजस्य सुतो महात्मा — [b]) D3 [अ]चर-, D7 [अ]चळ K3 B1 5 D3 9 -तुल्या (for -कल्पाम्) — [c]) B D3–11 T3 G2 ससंभ्रम, D1. 4 असंभ्रमाद्, G3 M2–4 °भ्रमन् (for °भ्रम) K2 शत्रुघाते — [d]) T3 G2 [ऽ]भि (for ऽनु) K3 नागै

23 [a]) D1 अथ (for ततो) K5 B (except B2) D3 9 तु, D1 [आ]शु, D10 [ऽ]थ, T3 स, T4 नु (for ऽस्य) — [b]) Dn D3. 4 स्रवत D7 जळद-, T3 ज्वलन- (for जलद) — D1 transp 23[c] and 23[d] — [c]) B D3 9 समासाद्य, D4 समुद्यम्य (for समाविध्य) — [d]) K4 B5 D1 3 10 11 पंचाल, D7 पाचाळ D5 सुत (for सुतस्) T1. 2 महात्मा (for तरस्वी)

24 [a]) D2 कुम्भभिन्न (for भिन्नकुम्भ) T2 विनदन् (for °द्य) — [b]) D4 चास्ये (for मुखात्) Dn D4–7 रुधिर, T4 क्षतजान् (for °ज) Dn D5–7 प्रमुचन्, D4 स्रवंश्च (for विमुञ्चन्) — [c]) D3 धरणीधराभं — [d]) K4 5 B (except B2) D2 3 9 -प्रकंपे च

C. 9 1090
B 9 20 25
L 9 19 25

क्षितिप्रकम्पाच्चलितो यथाद्रिः ॥ २४
निपात्यमाने तु तदा गजेन्द्रे
हाहाकृते तव पुत्रस्य सैन्ये ।
स शाल्वराजस्य शिनिप्रवीरो
जहार भल्लेन शिरः शितेन ॥ २५
हृतोत्तमाङ्गो युधि सात्वतेन
पपात भूमौ सह नागराज्ञा ।
यथाद्रिशृङ्गं सुमहत्प्रणुन्नं
वज्रेण देवाधिपचोदितेन ॥ २६

इति श्रीमहाभारते शल्यपर्वण्येकोनविंशोऽध्यायः ॥ १९ ॥

२०

संजय उवाच ।
तस्मिंस्तु निहते शूरे शाल्वे समितिशोभने ।
तवाभज्यद्बलं वेगाद्वातेनेव महाद्रुमः ॥ १
तत्प्रभग्नं बलं दृष्ट्वा कृतवर्मा महारथः ।
दधार समरे शूरः शत्रुसैन्यं महाबलः ॥ २
संनिवृत्तास्तु ते शूरा दृष्ट्वा सात्वतमाहवे ।
शैलोपमं स्थितं राजन्कीर्यमाणं शरैर्युधि ॥ ३
ततः प्रववृते युद्धं कुरूणां पाण्डवैः सह ।

(K_4 °पोच)लितो (for प्रकम्पाच्च°) $D_{1\ 7}$ (marg , *sec m*) यथा हत पविना अद्रिकूट

25 ^{a}) K_2 निपत्यमाने, G_2 निहन्य° (for निपात्य°) G_3 [ऽ]थ (for तु) Dn गतप्रवर्षे, D_4 T_3 G_2 M_1 गजप्रवीरे, $D_{5\ 6}$ $G_{1\ 3}$ गजप्रव(D_6 °वी)र्ये, D_9 तदा गजेंद्र, T_2 तथा गजेंद्रे, T_4 गजेंद्रवर्ये, M_{2-4} गजप्रवर्हे (for तदा गजेन्द्रे) — ^{b}) D_1 हाहापरे, D_3 °कृत, M_1 °कृतम् (for °कृते) T_3 सैन्यस्य राजन् (for पुत्रस्य सैन्ये) — ^{c}) K_1 M_{2-4} साल्व- $M_{2\ 4}$ -राज्ञश्च, M_3 -राजस्तु (for राजस्य) $D_{1\ 2}$ शनि (for शिनि-) D_4 प्रवीरे Dn D_{4-7} T G M_1 शा(T G M_1 सा)ल्वस्य राज्ञस्तु (T_3 °जस्तु, G_3 °ज्ञश्च) शिनिप्रवीरो — ^{d}) D_2 खड्गेन (for भल्लेन) $D_{5\ 7}$ T_2 सितेन

26 ^{a}) K_4 हृतोत्तमांगो, D_4 हृतोत्तमांगेन, D_5 कृत्तोत्तमांगो (for हृतो°) T_4 हृदि (for युधि) Dn D_4 सात्यकेन (for सात्वतेन) — ^{b}) K_{3-5} Dn $D_{2\ 4\ 6\ 8\ 9}$ T G $M_{1\ 2}$ पपात भूमौ स ह ना(G_3 युधि ना , M_1 स सना)गराज ($D_{4\ 8\ 9}$ °जा) — D_1 om 26^{cd} — ^{c}) D_3 यथेन्द्र (for यथाद्रि) B (except B_2) Dn $D_{2\ 4-9}$ $T_{1\ 2}$ सहसा (for सुमहत्) K_3 M_4 प्रनुन्नं, D_3 °मर्त्तं, $T_{3\ 4}$ G_2 °भिन्नं (for °णुन्न) — ^{d}) M_{2-4} वज्रायुध (for देवाधिप) Dn $D_{2\ 5-7}$ नोदितेन

Colophon om in Dn D_6 — *Adhy name* $Ś_1$ K_1 M_4 साल्वराजवध , $K_{2\ 3}$ $D_{10\ 11}$ T_1 M_2 शा(K_2 T_1 M_2 सा)ल्ववध , $D_{2\ 4}$ शल्यवध , M_3 साल्वावरोध — *Adhy no* (figures, words or both) K_3 D_{11} S 20, D_{10} 19 (as in text) — *Śloka no* K_5 28, Dn D_5 27

20

1 Dn om the ref. — ^{a}) M_1 ततस् (for तस्मिंस्) K_3 वि , D_4 च (for तु) $D_{5\ 7}$ निहिते $B_{3\ 4}$ शाल्वे, $T_{1\ 2}$ साल्वे, $G_{1\ 3}$ वीरे (for शूरे) $K_{4\ 5}$ तस्मिन्हते महेष्वासे — ^{b}) $Ś_1$ K_1 $T_{3\ 4}$ G M साल्वे, $B_{3\ 4}$ $T_{1\ 2}$ शूरे (for शाल्वे) — ^{c}) $Ś_1$ K (except K_3) Dn $D_{5\ 7}$ अभज्यत, $B_{2\ 4\ 5}$ $T_{1\ 3}$ G_2 तदाभज्यद् (for तवा°) M तवाभज्यत सैन्यं तद् . — ^{d}) D_4 वायुना D_3 [ए]व D_{10} यथा (for महा-) $K_{4\ 5}$ वातोद्धूत इव द्रुमः

2 ^{a}) K_3 तं प्र , T_3 तत्र (for तत्प्र-) D_7 बळ — ^{c}) T_3 ददार $Ś_1$ $K_{1\ 2}$ वीर (for शूर) Dn D_{5-7} वारयामास समरे — ^{d}) T G सेना (for -सैन्यं) D_2 महारथ , $D_{4\ 5}$ °बल, D_7 °बळ (for °बल)

